# Pratisara Stotram

# પ્રતિસરાસ્તોત્રમ્

## Document Information

Text title : Pratisara Stotram

File name : pratisarAstotram.itx

Category : devii, buddha, stotra, devI

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

Pratisara Stotram

# પ્રતિસરાસ્તોત્રમ્

ૐ નમઃ શ્રીપ્રતિસરાયૈ પ્રતિસરૈ !
અમરૌઘૈઃ પૂજિતાં ત્વાં નતોઽસ્મિ
પ્રતિપદજનરક્ષાકારિણીં સર્વકાલમ્ ।
ભૃગુદહનસમુદ્રાપાતદુઃખે સુરક્ષાં
રિપુવિષભયહત્રીં રાજ્યભોગાદિકર્ત્રીમ્ ॥ ૧॥

પરિવૃતનિજવર્ગાન્ ભક્તદત્તાપવર્ગાન્
કલિતદુરિતવર્ગાન્ મોક્ષલાભૈકમાર્ગાન્ ।
કૃતનરસુરસર્ગાન્ કારિતાનઙ્ગભઙ્ગાન્
સ્તુતિકૃતમુનિગર્ગાન્ સર્વરક્ષૈકસઙ્ગાન્ ॥ ૨॥

પ્રહૃતસકલવિઘ્ને સર્વલોકૈકમાન્યે
દશબલકૃતધન્યે પઞ્ચદેવીવરેણ્યે ।
વિષમપદશરણ્યે સર્વદા ત્વાં નમસ્યે
વસિત ઇવ અરણ્યે દાવદગ્ધે વિરસ્યે ॥ ૩॥

સકલજનસુવાઞ્છાપૂરણે કામધેનુ-
મભિલષિતફલાપ્ત્યૈ કલ્પવૃક્ષાગ્રવલ્લીમ્ ।
અસુરસુરનરાદ્યૈર્વન્દિતાઙ્ઘ્ર્યબ્જયુગ્મા-
મુરસિ લલિતાનાનારત્નમાલાદિયુક્તામ્ ॥ ૪॥

ઉડુપતિશતદીપ્તાં શઙ્ખકુન્દાવદાતાં
ગ્રહભયપરિશાન્તાં વજ્રસત્ત્વાત્મિકાં તામ્ ।
શ્રવણલલિતલોલે કુણ્ડલે સંવહન્તીં
મુકુટમણિશિખાભિઃ કાશિતાં તાં નમામિ ॥ ૫॥

જનનિ સકલદુઃખાત્તારણી ત્વં પ્રસીદ
સપદિ વિગતરક્ષાં રક્ષ મે માતરં ચ ।
સકરુણરુદિતં માં ત્વદ્દયાસ્વસ્થભૂતં

કૃતસરસિનિપાતાં ત્વં ગતિસ્ત્વં ગતિર્નો ॥ ૬॥

પઠતિ પ્રતિસરાયાઃ સ્તોત્રમેતત્સદા યો
જ્વલનજલવિષાણાં ચોરશાર્દૂલકાનામ્ ।
સગદનિધનકાનાં ભીતયા નાશયન્તી
પ્રતિપદમલભગ્નં કામુના ધૈર્યલાભમ્ ॥ ૭॥

નિજજનપરિયુક્તા ધર્મકામાર્થવૃદ્ધા
રિપુગણપરિમુક્તા સૌખ્યમેવ પ્રભુક્તા ।
દદતિ વિપુલભોગ્યં કામદા સર્વદાઽસૌ
નિહતસકલપાપં મોક્ષમાયાન્તિ ચાન્તે ॥ ૮॥

વિગલિતનયનામ્બુઃ સાઞ્જલિઃ સંવિલાપી
સ્તુતિમિતિ પ્રચકાર ત્રૈભવાનાં જનન્યાઃ ।
ભવતુ મમ તુ સમ્પત્ સર્વભાવા કૃશાનો
તનુ કુશલસુરક્ષા ઇત્થમેવં સુચિત્તઃ ॥ ૯॥

વિપચતુ મયિ સર્વં માદૃશં કર્મ ભોગ્યં
સસુરનરચયાનાં ભ્રાતૃમાતૃદ્રુહાણામ્ ।
કુરુત કુરુત ધૈર્યં યેન મોક્ષં સુલભ્યં
જઠરનિલયવાસં માસ્તુ પાપં કદાચિત્ ॥ ૧૦॥

ઉદરનરકવાસં યે તદા સાવતારં
સતતશુભસુચેતાઃ સાધયિષ્યામિ બોધિમ્ ।
કૃતજગતિ સુરક્ષાં યેન કૈવલ્યપ્રાપ્તિઃ
ઇતિ મુદિતસુચેતાઃ કર્મણા દિગ્ધચિત્તઃ ॥ ૧૧॥

પ્રતિસર અવતાર્યાં સામ્બિકાં મા વિલમ્બ
અનિશમિતિવદન્ સો નિન્દયન્ વૈ સ્વકર્મ ।
પ્રતિભયવિષદિગ્ધસ્તસ્થિવાનર્ભકઃ સન્
મુહુરિહ હિ શરણ્યાં તાં સ્મરન્ સર્વરક્ષામ્ ॥ ૧૨॥

અહો સુધન્યા જગદેકમાતા
પ્રક્રાન્તદૈવા રિપુવર્ગભીતા ।
યસ્યાઃ પ્રભાવાદ્વિહિતાત્યપાપાત્
પ્રયાતિ વહ્નિર્જલશીતલત્વમ્ ॥ ૧૩॥

પ્રભાવતાહો પુનરેવ તસ્યાઃ
વહ્નિં જલં ચાપિ ગિરિં સ્થલં વૈ ।
યસ્યાઃ સ્મૃતેનૈવ સવિસ્મતીયાન્
વૈશ્વાનરઃ પ્રાપ દ્વિધાકૃતિં તામ્ ॥ ૧૪॥

ગોપાશરીરં હ્રદપાતશીતં
શૈતં ત્વનાશાર્થમિવાધિકોષ્ણામ્ ।
દૈવાદિદત્તાભિજને સમન્તા-
ન્નિતાન્તદૂરાદતિપાપદત્તામ્ ॥ ૧૫॥

ઇતિ શ્રીભદ્રકલ્પાવદાનોદ્ધૃતં યશોધરાગર્ભસ્થબાલકૃતં
પ્રતિસરાસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Pratisara Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*